Q.P. Code – 56641

## First Year M.A. Degree Examination, OCTOBER/NOVEMBER 2015

## (Directorate of Distance Education)

*(Repeaters and Freshers)*

**Sanskrit**

**(DPA 510) Paper I – CLASSICAL SANSKRIT LITERATURE – I**

**Texts : 1) Kirātārjunīyam I and II cantos**

**2) Mahāśwetavrttānta of Kādambarī**

*Time : 3 Hours]* *[Max. Marks : 70/80*

***सूचना :*** *संस्कृतभाषया कन्नडभाषया आंग्लभाषया वा उत्तरितव्या।*

I. श्लोक**द्वयं** विवृणुत । **2 × 5 = 10**

(a) क्रियासु युक्तैर्नृप! चारचक्षुषो न वञ्चनीयाः प्रभवोऽनुजीविभिः।
अतोऽर्हसि क्षन्तुमसाधु साधु वा हितं मनोहारि च दुर्लभं वचः।।

(b) पुरःसरा धामवतां यशोधनाः सुदुःसहं प्राप्य निकारमीशम्।
भवादृशाश्चेदधिकुर्वते रतिं निराश्रया हन्त हता मनस्विना।।

(c) चतसृष्वपि ते विवेकिनी नृप विधासु निरुढिमागता।
कथमेत्य मतिविपर्ययं करिणी पङ्कमिवावसीदति।।

II. **एकं** गद्यभागं सानुवादं व्याख्यात। **10**

(a) आसीच्च मम मनसि – 'शान्तात्मनि दूरीकृतसुरतव्यतिकरेऽस्मिन् जने मां निक्षिपता किमिदमनार्येणासदृशमारब्धं मनसिजेन। एवञ्च नामातिमूढं हृदयमङ्गनाजनस्य, यदनुरागविषययोग्यतामपि विचारयितुं नालम्। क्वेदमतिभास्वरं धाम तेजसां तपसाञ्च, क्व च प्राकृतजनाभिनन्दितानि मन्मथपरिष्पन्दितानि। नियतमयं मामेवं मकरलाञ्छनेन विडम्ब्यमानामुपहसति। मनसा चित्रञ्चेदं यदहमेवं गच्छन्त्यपि न शक्नोम्यात्मनो विकारमुपसंहर्तुम्'

(अथवा)

(b) एवमुक्ता दीर्घमुष्णञ्च निश्वस्यं बाष्पायमानलोचना सनिर्वेदमवादीत् – 'राजपुत्र! या तस्यामतिदारुणायां हतनिशायमेभिरतिनृशंसैरसुभिर्न परित्यक्ता, सेदानीं परित्यज्यत इति दूरापेतम्। नूनमपुण्योपहतायाः पापायाः मम भगवानन्तकोऽपि परिहरति दर्शनम्। कुतश्च में कठिनहृदयायाः शोकः, सर्वमिदमलीकमस्य दुरात्मनः शठहृदयस्य, सर्वथाहमनेन त्यक्तत्रपेण निरपत्रपाणामग्रेसरीकृता।'

III. (a) पञ्चमहाकाव्येषु किरातार्जुनीयस्य स्थानं निर्धरत। **10**

**(अथवा)**

(b) किरातार्जुनीयस्य द्वितीय सर्गं विमृशत।

IV. (a) 'गद्यं कवीनां निकषं वदन्ति' विशदयत। **10**

**(अथवा)**

(b) महाश्वेतायाः पात्रचित्रणं कुरुत।

V. **'क'** विभागा**द्वयं 'ख'** विभागा**द्वयं** प्रसङ्गानुसारं व्याख्यात। **4 × 2½ = 10**

**'क' विभागः**

(a) रुजन्ति चेतः प्रसभं समाधयः।

(b) न विषादेन समं समृद्धयः।

(c) अहो दुरन्ता बलवद्विरोधिता।

**'ख' विभागः**

(d) अहो! जगति जन्तूनामसमर्थितोपनतान्यापतन्ति वृत्तान्तराणि।

(e) धैर्यधना हि साधवः।

(f) कठिनहृदये! दर्शनमात्रकेणापि न पुनरनुगृहीतोऽयमनुगतो जनः।

VI. (a) संस्कृतभाषायां अनुवादं कुरुत। (**केवलं कन्नड–आंग्लमाध्यमाभ्यर्थिनां कृते**) **10**

Vedas are the most ancient and sacred scriptures of India. The Indian visionaries of the past and present have reposed staunch faith in them and considered them as authentic. Vedas are the representation of the divine truth. They are eternal. They are not the work of man and are hence called 'Apauruseya' or of divine origin. Vedas are the source of origin for the tradition of entire Indian poetry, history and also for achieving the four purusharthas. Indians accept vedic statements without questioning. There is complete unanimity among all the scholars that Veda is authentic.

ಭಾರತದ ಅತ್ಯಂತ ಪ್ರಾಚೀನವಾದ ಮತ್ತು ಅತೀ ಪವಿತ್ರವಾದ ಧರ್ಮ ಗ್ರಂಥಗಳೇ ವೇದಗಳು. ಭಾರತದ ಹಿಂದಿನ ಮತ್ತು ಇಂದಿನ ಎಲ್ಲಾ ದಾರ್ಶನಿಕರು ವೇದಗಳನ್ನು ತಮ್ಮ ನಂಬಿಕೆಯ ಮೂಲವನ್ನಾಗಿ ಮತ್ತು ಪ್ರಮಾಣ ಗ್ರಂಥವನ್ನಾಗಿ ಸ್ವೀಕರಿಸಿದ್ದಾರೆ. ವೇದಗಳು ದೈವೀ ತತ್ತ್ವವನ್ನು ಪ್ರತಿನಿಧಿಸುವುವು. ಅವು ನಿತ್ಯ ಅವು ಯಾರಿಂದಲೂ ರಚಿತವಾದವುಗಳಲ್ಲ. ಆದ್ದರಿಂದಲೇ ಅಪೌರುಷೇಯ. ಭಾರತದ ಸಕಲ ಕಾವ್ಯ–ಇತಿಹಾಸಾದಿ ಪರಂಪರೆಗಳಿಗೂ, ಧರ್ಮಾದಿ ಚತುರ್ವಿಧ ಪುರುಷಾರ್ಥಗಳಿಗೂ ಮೂಲ ಉಗಮ ಸ್ಥಾನವೇ 'ವೇದ' ವೇದ ವಾಕ್ಯವೆಂದರೆ ಭಾರತೀಯ ಜನತೆಗೆ ಮರುಮಾತಿಲ್ಲದೆ ನಡೆಸಬೇಕಾದುದು ಎಂಬ ಗೌರವ ಭಾವನೆ ಇದೆ. ಶಾಸ್ತ್ರಕಾರರಿಗೆಲ್ಲ ವೇದ ಪ್ರಾಮಾಣ್ಯದ ವಿಷಯದಲ್ಲಿ ಐಕಮತ್ಯವಿದೆ.

(b) कन्नडभाषायां आंग्लभाषायां **वा** अनुवादं कुरुत (**केवलं आंग्लकन्नडमाध्यमाभ्यर्थिनां कृते**) **10**

अस्ति केरलेषु पूर्णायाः सरितस्तटे कालटी नामको ग्रामः। तमध्युवास शिवगुरुर्नाम द्विजेन्द्रो, यस्य विद्याधिराज इत्यन्वर्था समाख्या प्रथते स्म। तस्य पत्न्यामार्याम्बायां लोकगुरुः श्रीशङ्करो जज्ञे। कवचहरीये वयसि वर्तमाने पुत्रे शिवगुरुः शिवसायुज्यमवाप। सुमेधाः श्रीशङ्करो माता नियुक्तो गुरुकुले वेदान् शास्त्राणि चाधिजगे। अद्भुतप्रतिभोऽयं बालकः अष्टहायन एवाधीतविद्यो गुरुकुलात् समावृत्तः। निसर्गतो निवृत्तिमार्गमनुसन्दधानः श्रीशङ्करो मातरं प्रसाद्य संन्यासं गृहीतवान्। "यदहरेव विरजेत् तदहरेव प्रव्रजेत्, ब्रह्मचर्यादेव प्रव्रजेत् गृहाद्वा वनाद्वा" इति हि समामनन्ति।

VII. सूक्ति**द्वयस्य** अर्थविस्तरणं कुरुत। (**केवलं संस्कृत माध्यमाभ्यर्थिनां कृते**) **20**

(a) सर्वे गुणाः काञ्चनमाश्रयन्ति।

(b) दानमेकं कलौ युगे।

(c) नहि ज्ञानेन सदृशम् पवित्रमिह विद्यते।

**FOR FRESHERS ONLY**

VIII. (a) वनेचरस्य उक्तीः संगृह्य लिखत। **10**

**(अथवा)**

(b) बाणस्य देशकाल कृतीः अधिकृत्य प्रबन्धमारचयत।

---

**Q.P. Code – 56642**

## First Year M.A. Degree Examination, OCTOBER/NOVEMBER 2015

## (Directorate of Distance Education)

## Sanskrit

## (DPA 520) Paper II – CLASSICAL LITERATURE – II

**Texts : 1) Drama – Abhijnana Shakuntalam**

**2) History of Classical Sanskrit Literature**

*Time : 3 Hours]* *[Max. Marks : 70/80*

***सूचना :*** *संस्कृतभाषया कन्नडभाषया आंग्लभाषया वा उत्तरितव्या।*

I. (a) (i) शकुन्तलायाः पात्रचित्रणं कुरुत। **10**

(अथवा)

(ii) 'अभिज्ञानशाकुन्तलम्' शीर्षिकां समर्थयत।

(b) **द्वे** अधिकृत्य लघुटिप्पणी लिखत । **2 × 3 = 6**

(i) अङ्कावतारः।

(ii) अनसूया।

(iii) शार्ङ्गरव।

(iv) सूत्रधारः।

II. (a) अधोनिर्दिष्टेषु **द्वौ** अनूद्य विवृणुत। **2 × 5 = 10**

(i) अधरः किसलयरागः कोमलविटपानुकारिणौ बाहू।
कुसुममिव लोभनीयं यौवनमङ्गेषु सन्नद्धम्।।

(ii) अनुकारिणी पूर्वेषा युक्तरूपमिदं त्वयि।
आपन्नाभयसत्रेषु दीक्षिताः खलु पौरवाः।।

(iii) दुष्यन्तेनाहितं तेजो दधानां भूतये भुवः।
अवेहि तनयां ब्रह्मन्नग्निगर्भां शमीमिव।।

(iv) अनुमतगमना शकुन्तला तरुभिरियं वनवासबन्धुभिः।
परभृतविरुतं कलयतः प्रतिवचनीकृतमेभिरात्मनः।।

(b) अधोनिर्दिष्टेषु **त्रीणि** ससन्दर्भं व्याख्यात। **3 × 3 = 9**

(i) सुविहितप्रयोगतया आर्यस्य न किमपि परिहस्यते।

(ii) कथमियं सा कण्वदुहिता शकुन्तला!

(iii) अत एव त्वं प्रियंवदेति भण्यसे।

(iv) समुद्ररसना चोर्वी सखी च युवयोरियम्।

(v) तद्वीतरागस्य अशरणस्य नास्ति मे मोक्षः।

III. संस्कृतगद्यसाहित्यक्षेत्रं प्रति बाणभट्टस्य दण्डिनः <u>**वा**</u> योगदानम् विमर्शयत। **10**

IV. (a) 'तावद्भारवेर्भाति यावन्माघस्य नोदयम्' – विवेचयत। **10**

**(अथवा)**

(b) पञ्चमहाकाव्येषु नैषधचरितस्य स्थानं विमर्शयत।

V. रूपकक्षेत्रं प्रति शूद्रकस्य, विशाखदत्तस्य <u>**वा**</u> योगदानं विवेचयत। **10**

VI. **द्वे** अधिकृत्य लघुटिप्पणी लिखत। **2 × 2½ = 5**

(a) भट्टनारायणः।

(b) हितोपदेशः।

(c) धनञ्जयः।

(d) उत्तमरामचरितम्।

**FOR FRESHERS ONLY**

VII. (a) संस्कृत साहित्यस्य प्रमुख खण्डकाव्यान् विमर्शयत। **10**

**(अथवा)**

(b) संस्कृत साहित्यक्षेत्रं प्रति कालिदासस्य योगदानं विवेचयत।

## Q.P. Code – 56643

### First Year M.A. Degree Examination, OCTOBER/NOVEMBER 2015

### (Directorate of Distance Education)

*(For Repeaters and Freshers)*

### Sanskrit

### (DPA 530) Paper III – VYAKARANA AND BHARATIYA TATTVA SHASTRA

**Texts : 1) Siddhanta Kaumudi (From Karaka to Pradisamasa)**

**2) Nyayasutra (I and II chapters)**

**3) Sarvadarshana Sangraha (Charvaka, Bauddha, Ramanuja and Poornaprajna Darshana's only)**

*Time : 3 Hours]* *[Max. Marks : 70/80*

***सूचना :*** *संस्कृतभाषया कन्नडभाषया आंग्लभाषया **वा** उत्तरितव्या।*

I. **चत्वारि** सूत्राणि सोदाहरणं विवृणुत। **4 × 2.5 = 10**

(a) कर्तुरीप्सिततमं कर्म।

(b) स्वतन्त्रः कर्ता।

(c) सहयुक्तेऽप्रधाने।

(d) चतुर्थी सम्प्रदाने।

(e) भीत्रार्थानां भयहेतुः।

(f) कर्तृकर्मणोः कृति।

II. अपादानकारकं अधिकरणकारकं वा संक्षेपेण निरूपयत। **5**

III. **चतुर्णां** सप्रमाणं विग्रहवाक्यानि लिखत। **4 × 2.5 = 10**

(a) यथाशक्ति (b) त्रिमुनि

(c) मध्याह्नः (d) पञ्चगवम्

(e) शाकपार्थिवः (f) महादेवः

IV. (a) न्यायसूत्रमनुसृत्य अनुमानप्रमाणं निरूपयत। **10**

**(अथवा)**

(b) न्यायसूत्रानुसारेण पञ्चावयवान् प्रतिपादयत।

V. (a) **त्रीणि** सूत्राणि विवृणुत। **3 × 3 = 9**

(i) प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम्।

(ii) युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम्।

(iii) पुनरुत्पत्तिः प्रेत्यभावः।

(iv) प्रवृत्तिदोषजनितोऽर्थः फलम्।

(b) न्यायसूत्रानुसारं **त्रयाणां** लघुटिप्पणीः लिखत। **3 × 2 = 6**

(i) प्रमाणम्

(ii) शरीरम्

(iii) अपवर्गः

(iv) संशयः।

VI. (a) (i) "प्रत्यक्षमात्रं प्रमाणम्" चार्वाकानुसारं साधयत। **11**

**(अथवा)**

(ii) रामानुजमतानुसारं पञ्चविधमीश्वरोपासनं निरूपयत।

(b) **त्रीण्य**धिकृत्य लघुटिप्पणीः लिखत। **3 × 3 = 9**

(i) देहात्मवादः।

(ii) बौद्धमते पञ्चविधः स्कन्धः।

(iii) पूर्णप्रज्ञदर्शने पञ्चभेदाः।

(iv) रामानुजमते तत्त्वमसिश्रुत्यर्थः।

**FOR FRESHERS ONLY**

VII. (a) चार्वाकमतस्य सारं सङ्गृहूणीत। **10**

**(अथवा)**

(b) चार्वाकमतानुसारं अनुमानस्य प्रामाण्यं निराकुरुत।

**Q.P. Code – 56644**

## First Year M.A. Degree Examination, OCTOBER/NOVEMBER 2015

## (Directorate of Distance Education)

*(For Repeaters and Freshers)*

**Sanskrit**

**(DPA 540) Paper IV – SPECIAL ALANKARA – I**

**Texts : 1) Appayya Dixita's Kuvalayananda (Upama to Vyatireka)**

**2) Dhvanyaloka – 1 to 2 chapters only**

**3) Theories of Alankara and Riti**

*Time : 3 Hours]* *[Max. Marks : 70/80*

***सूचना :*** *संस्कृतभाषया कन्नडभाषया आंग्लभाषया वा उत्तरितव्या।*

I. संस्कृत साहित्यक्षेत्रं प्रति भरतस्य रुद्रटस्य वा योगदानं निरूपयत। **10**

II. **चतुर्णां** अधिकृत्य सोदाहरणं विवृणुत। **4 × 3 = 12**

(a) अनन्वयः।

(b) संदेहः।

(c) आवृत्तिदीपकः।

(d) व्यतिरेकः।

(e) पूर्णोपमा।

(f) तुल्ययोगिता।

III. अपह्नुति अलङ्कारं अतिशयोक्त्यलङ्कारं वा सोदाहरणं विवृणुत। **10**

IV. अलङ्कार**द्वयं** निर्दिश्य व्याख्यात। **2 × 4 = 8**

(a) त्वल्लोचनसमं पद्मं त्वद्वक्त्रसदृशो विधुः।

(b) अयं कलङ्किनश्चन्द्रान्मुखचन्द्रोऽतिरिच्यते।

(c) त्वमेव कीर्तिमान्राजन् विधुरेव हि कान्तिमान्।

(d) यद्वातुः सौम्यता सेयं पूर्णेन्दोरकलङ्कता।

V. (a) ध्वन्यालोकस्य मङ्गलश्लोके अभिव्यज्यमानं त्रिविधध्वनिं विवृणुत। **10**

**(अथवा)**

(b) वाच्यव्यङ्ग्ययोः वैलक्षण्यं सोदाहरणं समर्थयत।

VI. अधोनिर्दिष्टेषु **द्वयं** व्याख्यात। **2 × 4 = 8**

(a) विभाति लावण्यमिवाङ्गनासु।

(b) अलङ्कारो हि चारुत्वहेतुः प्रसिद्धः।

(c) कस्यचिद् ध्वनिभेदस्य सा तु स्यादुपलक्षणम्।

(d) रसाभासे चाङ्गत्वमप्यविरुद्धम्।

VII. अधोनिर्दिष्टेषु **चतुर्णां** काव्यसौन्दर्यं विवृणुत। **4 × 3 = 12**

(a) श्वश्रूरत्र निमज्जति अत्राहं दिवसक प्रलोकय।
मा पथिक! रात्र्यन्धक! शय्यायामावयोर्माङ्क्षीः।।

(b) आहूतोऽपि सहायैरोमित्युक्त्वा विमुक्तनिद्रोऽपि।
गन्तुमना अपि पथिकः सङ्कोचं नैव शिथिलयति।।

(c) शिखरिणि क्व नु नाम कियच्चिरं किमभिधानमसावकरोत्तपः।
सुमुखि येन तवाधरपाटलं दशति बिम्बफलं शुकशावकः।।

(d) कुपिताः प्रसन्ना अनरुदितवदना विहसन्त्यः।
यथा गृहीतास्तथा हृदयं हरन्ति स्वैरिण्यो महिलाः।।

(e) तदा जायन्ते गुणा यदा ते सहृदयैर्गृह्यन्ते।
रविकिरणानुगृहीतानि भवन्ति कमलानि कमलानि।।

(f) गगनं च मत्तमेघं धारालुलितार्जुनानि च वनानि।
निरहङ्कारमृगाङ्का हरन्ति नीला अपि निशाः।।

**FOR FRESHERS ONLY**

VIII. संस्कृत साहित्यक्षेत्रे कुवलयानन्दस्य ध्वन्यालोकस्य <u>वा</u> महत्त्वं वर्णयत। **10**

---